**पदानि ।**

अर्थयुक्तः अक्षरसङ्घातः शब्दः, धातु, प्रत्ययो वा भवति । शब्दः व्याकरणशास्त्रे प्रातिपदिकम् इति व्यवह्रियते । शब्देन सह प्रत्ययस्य संयोगेन पदं निष्पन्नं भवति । वाक्येषु पदानामेव प्रयोगः भवति, न तु प्रातिपदिकानाम् । एकः वर्गः अपि अर्थपूर्णः सन् शब्दो भवितुमर्हति यथा ' अ ' इति विष्णुपर्यायः ।

पदेषु स्वराक्षराणि व्यञ्जनाक्षराणि च मिलितानि वर्तन्ते - उदा - न+आ=ना, न्+ अ+ र्+ अः= नरः, भ्+ऊः= भूः, भ् + ऊ + म् + इः = भूमिः । संस्कृतभाषायां पदे अक्षराणां य उच्चारणक्रमः स एव लिप्यामपि पाल्यते । सर्वेषां वर्णानां स्पष्टतया उच्चारणमावश्यकम् । पदस्य उच्चारणे लेखने च साधुतासंपादनाय तस्मिन् स्वर- व्यञ्जनविन्यासः सम्यक् अवगन्तव्यः । अधोदत्तानि उदाहरणानि अवधातव्यानि - आकाशः = आ+क्+आ+श्+अः ।

कुसुमम् =क्+उ+स्+उ+म्+अ+म् ।

वाणी =व्+आ+ण्+ई ।

**अभ्यासः ।**

एवम् , अधः प्रदत्तानां पदानाम् अक्षरविन्यासक्रमं दर्शयत-

बालः-

जीवनम्-

कूर्मः-

ओदनः-

कौतुकम्-

अधुना अधः प्रदत्तानाम् अक्षराणां पदरूपं दर्शयत पदानि उच्चार्यतां च ।

व्+अ+न्+इ+त्+आ-

व्+आ+य्+उः-

ल्+ए+ख+अ+न्+ई-

व्+अ+न्+अ+म्-

**लिङ्गबोधः ।**

पुंल्लिङ्गः, स्त्रीलिङ्गः, नपुंसकलिङ्गश्चेति नामशब्दानां त्रैविध्यमस्ति । नामलिङ्गानुशासने आचार्येण प्रदर्शितमिदं विभजनम् । शब्दानां रूपं विशेषणानां सामीप्यं, काव्यादिषु पूर्वसूरीणां प्रयोगञ्च परीक्ष्य शब्दानां लिङ्गनिर्णयः साधु अवगन्तव्यः । अकारः अन्तः येषां ते अकारान्ताः, इकारः अन्तः ये ते इकारान्ताः, उकारः अन्तः येषां ते उकारान्ताः, ऋकारः अन्तः येषां ते ऋकारान्ताः,ऐकारः अन्तः येषां ते ऐकारान्ताः,ओकारः अन्तः येषां ते

ओकारान्ताः, औकारः अन्तः येषां ते औकारान्ताः व्यञ्जनाक्षराणि अन्तानि येषां तानि व्यञ्जनान्तानि, हलन्तानि इति च उच्यन्ते। शब्दानां लिङ्गनिर्णयः शब्दमेव आश्रयते न तु अर्थम्। लिङ्गः प्रातिपदिकानाम् अन्तिमवर्णश्च शब्दानां तत्तद्विभक्तौ रूपनिर्णये नितान्तं प्राधान्यमावहन्ति।

अकारान्तपुल्लिङ्गशब्दानां परिचयाय अधप्रदत्तां पट्टिकां निरीक्षताम्।

बालः सूर्यः गजः मूषकः विद्यालयः

शुकः करः अजः मार्जारः करदीपः

खगः कर्णः दीपः वानरः दिवाकरः

सर्पः पादः काकः ऋषभः स्थलदीपः

वृक्षः सिंहः चन्द्रः सैनिकः हंसः

अश्वः कूपः माधवः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .... इत्यादयः

**इकारान्तपुल्लिङ्गशब्दाः।**

मुनिः हरिः ऋषिः

अग्निः मणिः रविः

कपिः असिः कविः .... इत्यादयः

**उकारान्तपुल्लिङ्गशब्दाः।**

गुरुः तरुः

भानुः शिशुः

सूनुः सेतुः .... इत्यादयः

**ऋकारान्तपुल्लिङ्गशब्दाः।**

वक्तृ श्रोतृ

पितृ भ्रातृ .... इत्यादयः

**ऐकारान्तपुल्लिङ्गशब्दाः।**

रै

**औकारान्तपुल्लिङ्गशब्दः।**

ग्लौ

**हलन्तपुल्लिङ्गशब्दः।**

आत्मन्विद्वस्मरुत्

ब्रह्मन्पुंस्सुहृद्

चन्द्रमस्जलमुच्

वेधस्वणिज् .... . . . . . . . . . . . . . . . . इत्यादयः

**आकारान्तस्त्रीलिङ्गशब्दाः।**

अजा प्रार्थना

बाला पेटिका

माला वनिता

नौका पाठशाला

जाया देवप्रिया .... . . . . . . . . . . . . . . . . इत्यादयः

**इकारान्तस्त्रीलिङ्गशब्दाः।**

अङ्गुलिः बुद्धिः

प्रकृतिः रात्रिः

भूमिः . . . . . . . . . . . . . . . . . . . . . . .... इत्यादयः

**ईकारान्तस्त्रीलिङ्गशब्दाः।**

जननी श्रीः धीः

कौमुदी मही

नर्तकी नारी

लेखनी नदी . . . . . . . . . . . . . . . .... इत्यादयः

**उकारान्तस्त्रीलिङ्गशब्दाः।**

रेणुः तनुः

धेनुः चञ्चुः .... इत्यादयः

**ऊकारान्तस्त्रीलिङ्गशब्दाः।**

वधूः चम्पूः श्वश्रूः .... . . . . . . . . . . . . . . . . . . . . . . . इत्यादयः

**ऋकारान्तस्त्रीलिङ्गशब्दाः।**

मातृ स्वसृ दुहितृ .... इत्यादयः

**ओकारान्तस्त्रीलिङ्गशब्दाः।**

द्यो

**औकारान्तस्त्रीलिङ्गशब्दाः।**

नौ

**हलन्तस्त्रीलिङ्गशब्दाः ।**

दिश्  सरित्  योषित्  वाच् . . . . . . . . . . . . . . . . . . . . . .... इत्यादयः

व्यञ्जनान्त ( हलन्त) स्त्रीलिङ्गशब्दाः आ इति स्त्रीप्रत्यययोजनेन आकारान्तवदपि प्रयुज्यन्ते ।

उदा - तृट् - तृषा

क्षुध् - क्षुधा

दिक् - दिशा

निश् - निशा. . . . . . . . इत्यादि ।

**अकारान्तनपुंसकलिङ्गशब्दाः ।**

वनम्  सुखम्  पुस्तकम्

धनम्  दु:खम्  वातायनम्

जलम्  वस्त्रम्  नयनम्

गृहम्  मुखम्  पत्रम्  पात्रम् . . . . . . . . . . . . . . . . . . . . . . .... इत्यादयः

**इकारान्तनपुंसकलिङ्गशब्दाः ।**

वारि  दधि  अक्षि . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .... इत्यादयः

**उकारान्तनपुंसकलिङ्गशब्दाः ।**

मधु  वस्तु  श्मश्रु

जानु  अश्रु  अम्बु . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .... इत्यादयः

**ऋकारान्तनपुंसकलिङ्गशभ्दः ।**

कर्तृ

**हलन्तनपुंसकलिङ्गशब्दाः ।**

नामन्  मनस्  यशस्

धामन्  नभस्  तपस्

जगत्  कर्मन्  पयस् .... . . . . . . . . . . . . . . . . . . . . . . . . . इत्यादयः

पदं द्विविधं भवति । सुबन्तं तिङन्तं च । नामपदानि, सर्वनामपदानि, विशेषणानि, अव्ययानि इत्यादीनि सुबन्तानि ।

नामपदम् - उदा - रामः । सीता । वनम् ।

सर्वनामपदम् - उदा - सर्व । त्वम् । अहम् । एषा ।

विशेषणम् - उदा - सुन्दरः । सुन्दरी । सुन्दरम् ।

अव्ययम् - उदा - उच्चैः । नीचैः ।

**अजन्तनामशब्दाः ।**

| *अन्तः* | *पुंल्लिङ्गः* | *स्त्रीलिङ्गः* | *नपुंसकलिङ्गः* |
|---|---|---|---|
| अकारान्तः | बालः | - | वनम् |
| आकारान्तः | विश्वपाः | बाला | - |
| इकारान्तः | कविः | भूमिः | वारि |
| ईकारान्तः | सेनानी | नदी | - |
| उकारान्तः | गुरुः | धेनुः | मधु |
| ऊकारान्तः | खलपूः | वधूः | - |
| ऋकारान्तः | पितृ | मातृ | कर्तृ |
| ऐकारान्तः | रै | - | - |
| ओकारान्तः | गो द्यो | - | - |
| औकारान्तः | ग्लौ नौ | - | - |

**व्यञ्जनान्तशब्दाः । (हलन्तशब्दाः)**

| अन्तः | पुल्लिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|
| ककारान्तः | सर्वसक् | | |
| चकारान्तः | लमुक् | वाच्/ वाक् | तिर्यञ्च् |
| जकारान्तः | वणिक् | स्त्रक् | असृक् |
| तकारान्तः | मरुत् | हरित् | पचत् |
| नकारान्तः | राजन् | सीमन् | नामन् |
| णकारान्तः | सुगण् | | |
| दकारान्तः | सुपाद् | शरद् | |
| सकारान्तः | विद्वस् | मनस् | |
| पकारान्तः | गुप् | आपः ( नित्यबहुवचनान्तः) | |

**अभ्यासः ।**

अधोदत्तानि पदानि पुल्लिङ्गस्त्रिलिङ्गनपुंसकलिङ्गक्रमेण लिखत ।

| | | | |
|---|---|---|---|
| मयूरः | पुमान् | लता | पुस्तकम् |
| बालिका | विद्यालयः | विद्वान् | पण्डितः |
| ब्रह्मा | अध्यापिका | पादः | अजा |

| | | | |
|---|---|---|---|
| बुद्धिः | छात्रः | अङ्गुली | करदीपः |
| जाया | व्यजनं | नाम | माता |
| पनसम् | नेत्रम् | वायुः | भ्राता |
| रात्रिः | कण्ठः | कार्यालयः | गौरी |
| लेखनी | घटिका | गङ्गा | केशः |
| भल्लूकः | नक्षत्रम् | बकः | तृणम् |
| वीणा | पर्वतः | वानरी | कलत्रम् |